Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 23

**P–95–Sanskritam - II**

No. of Printed Pages – 07

# प्रवेशिका परीक्षा, 2022

# PRAVESHIKA EXAMINATION, 2022

## संस्कृतम्

## (द्वितीय – प्रश्नपत्रम्)

**समय** : 2:45 **पादोनहोरात्रयम्**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्य–निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः।

2) सर्वे प्रश्नाः अनिवार्याः।

3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव लेख्यम्।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम्।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## खण्ड – अ

**1)** वस्तुनिष्ठ प्रश्नाः **[12 × 1 = 12]**

i) रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सन्ति – **[1]**

अ) तामसप्रियाः    ब) राजसप्रियाः

स) सात्त्विकप्रियाः    द) मानसप्रियाः

ii) कः कदाचित् न जायते? **[1]**

अ) आत्मा    ब) शरीरम्

स) देवः    द) नरः

iii) नरकस्य द्वारम् अस्ति – **[1]**

अ) एकविधम्    ब) द्विविधम्

स) पञ्चविधम्    द) त्रिविधम्

iv) राज्ञः वचनात् रामः कुत्र पतितुं कथयति? **[1]**

अ) जले    ब) कूपे

स) नद्याम्    द) पावके

v) कीदृशः कौत्सः गुरूदक्षिणायै महर्षिणं वरतन्तुं निवेदितवान्? **[1]**

अ) गुरूभक्तिविमुखः    ब) समाप्तविद्यः

स) प्राप्तसम्पद्    द) अप्राप्तविद्यः

vi) ताम्रचूडः आसीत् – **[1]**

अ) परिव्राजकः    ब) मूषकः

स) नृपः    द) मार्जारः

vii) परिव्राजकः नगरे किं कृत्वा प्राणयात्रां समाचरति स्म? **[1]**

अ) सेवाम्    ब) अध्ययनम्

स) भिक्षाटनम्    द) दानम्

viii) का पुत्रद्वयम् अजीजनत्? [1]

अ) श्रृगाली ब) सिंही

स) हस्तिनी द) मूषिका

ix) पञ्चतन्त्रस्य रचनाकारो वर्तते – [1]

अ) पं. विष्णु शर्मा ब) पं. नारायणः

स) भर्तृहरिः द) भासः

x) विधुरेऽपि काले किं न त्याज्यम्? [1]

अ) निन्दाम् ब) मोहम्

स) क्रोधम् द) धैर्यम्

xi) वद्–धातोः लट्–लकारस्य मध्यमपुरूष–एकवचने रूपं विद्यते – [1]

अ) वदामि ब) वदसि

स) वदति द) वदतः

xii) बालक–शब्दस्य तृतीया–विभक्ति–एकवचने रूपम् अस्ति – [1]

अ) बालकः ब) बालकम्

स) बालकेन द) बालकाय

2) रिक्तस्थानानि पूरयत – [6 × 1 = 6]

i) कर्मण्येवाधिकारस्ते मा _________ कदाचन। [1]

ii) शीलं हि सर्वस्य _________ भूषणम्। [1]

iii) पुरा देवासुरे _________ पिता ते मम राघव। [1]

iv) स कूर्म इव दुर्बुद्धिः _________ भ्रष्टो विनश्यति। [1]

v) अस्ति दाक्षिणात्ये जनपदे _________ नाम नगरम्। [1]

vi) अकृत्यं नैव कर्त्तव्यं _________ त्यागेऽप्युपस्थिते। [1]

3) अधोलिखितप्रश्नानाम् उत्तराणि एकशब्देन लिखत – [12 × 1 = 12]

i) मठायतने सिद्धमन्नं कस्मात् भयात् भिक्षापात्रे स्थापितम्? [1]

ii) ताम्रचूडस्य मित्रस्य नाम किम्? [1]

iii) ''गजोऽयं युष्मत्कुलशत्रुः'' इति केन कथितम्? [1]

iv) हिरण्यकताम्रचूडकथानुसारेण मूषकस्य नाम किम् आसीत्? [1]

v) नृपस्य रघोः कोषगृहे कस्य वृष्टिः अभूत्? [1]

vi) खलसज्जनानां मैत्री कीदृशी भवति? [1]

vii) कैकेयी कस्य कृते दण्डकारण्यगमनं वरम् अयाचत? [1]

viii) संकटविकटनाम्नी मित्रे कस्य आस्ताम्? [1]

ix) कस्मिन् छन्दसि तगण–भगण–जगण–जगणाः अन्ते च द्वौ गुरूवर्णौ भवन्ति? [1]

x) ''पश्य लाक्षारसासिक्तं रक्तं तच्चरणद्वयम्'' इत्यत्र कः अलंकारः? [1]

xi) मधु–शब्दस्य तृतीया–विभक्ति–एकवचनस्य रूपं लिखत। [1]

xii) क्रीड्–धातोः लट्–लकारस्य उत्तमपुरूषस्य एकवचनस्य रूपं लिखत। [1]

## <u>खण्ड – ब</u>

4) देही किं कृत्वा अन्यानि नवानि संयाति? [2]

5) यस्य समीपे वित्तमस्ति स नरः कीदृशः मन्यते? [2]

6) काष्ठभ्रष्ट कच्छपकथानुसारेण कीदृशः जनः दुःखं प्राप्नोति? [2]

7) सिंही श्रृगालसुतं किमर्थं न खादितवती? [2]

8) भिक्षापात्रं कः केन ताडयति स्म? [2]

9) ''अस्मद्''–शब्दस्य तृतीया–विभक्तेः रूपाणि लिखत। [2]

10) ''चुर्''–धातोः लङ्लकारस्य उत्तमपुरूषस्य रूपाणि लिखत। [2]

11) मालिनी–छन्दसः लक्षणं लिखत। [2]

12) शिखरिणी–छन्दसः उदाहरणं लिखत। [2]

13) रूपकालंकारस्य लक्षणं लिखत। [2]

14) उपमा–अलंकारस्य उदाहरणं लिखत। [2]

15) कृष्णस्य नामद्वयं लिखत। (अमरकोशानुसारम्) [2]

16) अमरकोशानुसारं गणेशस्य नाम द्वयं लिखत। [2]

## खण्ड – स

17) अधोलिखितयोः श्लोकयोः एकस्य सप्रसंगं व्याख्या लेखनीया – [3]

(क) विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरतिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्।।

(ख) स्थाने भवानेकनराधिपः सन्

अकिञ्चनत्वं मखजं व्यनक्ति।

पर्यायपीतस्य सुरैर्हिमांशोः

कलाक्षयः श्लाघ्यतरो हि वृद्धेः।।

18) एकस्याः कथायाः सारांशः संस्कृतेन लेख्यः। [3]

(क) काष्ठभ्रष्टकच्छपकथा

(ख) हिरण्यक–ताम्रचूडकथा

19) अधोलिखितयोः गद्ययोः कस्यचिद् एकस्य सप्रसंग–व्याख्या लेखनीया। [3]

(क) 'कृपया मया स्वस्तनक्षीरेण पुष्टिं नीतः। तद्यावदेतौ मत्पुत्रौ शिशुत्वात्, त्वां श्रृगालं न जानीतः, तावद् द्रुततरं गत्वा स्वजातीयानां मध्ये मिलितो भव। नो चेत् आभ्यां हतो मृत्युपथं समेष्यसि।' सोऽपि तद्वचनं श्रुत्वा भयव्याकुलमनाः शनैः शनैश्पसृत्य स्वजात्या मिलितः।

(ख) तयोर्मध्ये मूषकबिलान्वेषणस्य वार्तां श्रुत्वा मयाऽपि चिन्तितम् – 'अहो विनष्टोऽस्मि।' ततोऽहं भयत्रस्तमनाः सपरिवारो दुर्गमार्गं परितज्य अन्यमार्गेण गन्तुं प्रवृत्तः। ततः परिजनो यावदग्रतो गच्छामि, तावत्सम्मुखीनो वृहत्कायो मार्जारः समायाति।

20) भवान् कुशाग्रः, राजकीय–वरिष्ठ–उपाध्याय–संस्कृत–विद्यालयः, हीरापुरस्य छात्रः रूग्णताकारणेन दिनत्रयस्य अवकाशाय प्रधानाचार्याय प्रार्थनापत्रं लिखतु। [3]

अथवा

नगरस्य उद्याने स्वच्छता नास्ति, बालक्रीडायाः साधनानि अपि न सन्ति। अतः व्यवस्थायाः कृते नगरपालिकाध्यक्षाय पत्रं लिखतु।

## खण्ड – द

21) अधोलिखितयोः श्लोकयोः एकस्य सप्रसंग–भावार्थः लेखनीयः। [1 + 3 = 4]

(क) अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।

(ख) इत्थं द्विजेन द्विजराजकान्ति –
रावेदितो वेदविदां वरेण।
एनोनिवृत्तेन्द्रियवृत्तिरेनं
जगाद भूयो जगदेकनाथः।।

22) अधोलिखितयोः श्लोकयोः एकस्य सप्रसंग–व्याख्या लेखनीया। [1 + 3 = 4]

(क) श्रोत्रं श्रुतेनैव न कुण्डलेन
दानेन पाणिर्न तु कङ्कणेन।
विभातिकायः करूणाकुलानां,
परोपकारेण न चन्दनेन।।

(ख) पुरा देवासुरे युद्धे पिता ते मम राघव।
रक्षितेन वरौ दत्तौ सशल्येन महारणे।।

23) कमप्येकं विषयमवलम्ब्य निबन्धं लिखत। [4]

(क) भारतीयासंस्कृतिः।

(ख) संस्कृत–दिवसः।

(ग) कालिदासः।

⌘⌘⌘

DO NOT WRITE ANYTHING HERE